# SACRED HEART SCHOOL

Maharana Pratap Chowk, Jhumri Telaiya, Koderma

Website: http://www.sacredheartkoderma.org/

## Sanskrit

## Class – X

1. गद्यांशम् पाठित्वा प्रश्नानाम् उत्तराणि लिखत–

(क) अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद–"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"

**प्रश्नाः (Questions)**

(I) एकपदेन उत्तरत–

(i) सा बुद्धिमती कुत्र एकं व्याघ्रं ददर्श? (ii) बुद्धिमती पुत्रद्वयोपेता कुत्र चालिता?

(II) पूर्णवाक्येन उत्तरत–

- सा पुत्रौ चपेटया प्रहृत्य किम् जगाद?

(III) भाषिककार्यम्–

(i) 'जगाद' इति क्रियापदस्य कर्तृपदं किम्?

(क) सा (ख) अगच्छन्तम् (ग) चपेटया (घ) तावत्

(ii) 'भार्या' इतिपदस्य विशेषणपदं किम्?

(क) तस्य (ख) चालिता (ग) बुद्धिमती (घ) चपेटया

(iii) 'आगच्छन्तम्' इति क्रियापदस्य विपर्ययपदं गद्यांशे किम्?

(क) गच्छन्तम् (ख) ददर्शम् (ग) कुरुथः (घ) पश्चात्